कारणम् :-

सर्वैः दार्शनिकैः कार्यकारणवादः स्वीक्रियते। कार्यस्य
संज्ञाप्रसङ्गे उच्यते - 'कार्यं प्रागभावप्रतियोगी', अर्थात् प्रागभावस्य
प्रतियोगीत्वं कार्यत्वम् इति कार्यलक्षणम्। कार्यकारणवादस्य
व्याख्याप्रसङ्गे उक्तम् - कार्योत्पत्तिनिमित्तात् यद् वस्तु
अवश्यमेव वर्तते तदेव ~~कारण~~ कारणम्।

Friday 14

कारणस्य लक्षणं अन्नंभट्टेनोक्तम् - 'कार्यनियतपूर्व
वृत्तित्वं कारणम्' कार्योत्पत्तेः प्राक् यद् वस्तु: कार्याधिकरणे
नियमेन तिष्ठति तदेव कारणम्। यथा - पटं प्रति
तन्त्वादिः कारणम्। यतः तन्तवः कार्योत्पत्तेः प्राक्
अवश्यं वर्तते। अतः तन्तवः कार्यस्य असाधारणकारणं
तदेव कारणम्। तुरिवेमादिकं कार्यस्य साधारणकारणम्।

कारणलक्षणस्य प्रतिपदस्य उपयोगीता प्रदृश्यते।
यदि केवलं 'पूर्ववृत्तिकारणम्' इति लक्षणं क्रियते चेत्
तर्हि रासभादौ अतिव्याप्ति स्यात्। यतः मृत्तिकानयनकार्ये

Saturday 15

रासभादिः अनियतः। अतः दोषनिवारणार्थं 'नियत'
पदं प्रदत्तम्। लक्षणे 'पूर्वम्' पदं अनुक्ते सति नियतम्
कार्यपूर्ववृत्तित्वात् कार्यमेव कार्यस्य कारणं स्यात्।
अत्र अतिव्याप्ति भवति। अतिव्याप्तिनिवारणाय 'पूर्वम्'
इति पदं प्रयुक्तम्।

कार्योत्पत्तेः पूर्वं अव्यवहितपूर्वक्षणे स्थित्वा
कारणम् आश्रयित्वा कार्यस्य कारणं भवति सा अन्यथासिद्धि
यथा - तन्तुरूपं पटस्य अन्यथासिद्धिः। त्रिविधान्यथासिद्धि-
व्यतिरिक्तः कार्यनियतपूर्ववृत्तित्वं कारणम्।

Sunday 16

दीपिकायामुच्यते - एवम् अनन्यथासिद्धनियतपूर्ववृत्तित्वं
'कारणत्वम्' इति कारणस्य निर्दोषलक्षणम्।

UltraTech CONCRETE
WE MAKE GOOD CONCRETE BETTER

17 Monday

कारणस्य विभागमाह - कारणं त्रिविधम्। यथा-
समवाय्यसमवायिनिमित्तभेदात्।

समवायिकारणम् - समवायिकारणस्य लक्षणं अन्नंभट्टेनोक्तम्- यत् समवेतं कार्यमुत्पद्यते तत् समवायिकारणम्। येषु तन्तुषु समवायेन सम्बन्धेन पटात्मकं कार्यमुत्पद्यते ते तन्तवः समवायिकारणम् इत्यर्थः। समवायिकारणम् उपादान कारणम्। समवायसम्बन्धेन कार्याधिकरणे तादात्म्यसम्बन्धेन यत् विद्यते तदेव समवायिकारणम्। यथा- पटं प्रति तन्तवः पटस्तु अवयवी तन्तवः अवयवाः। अवयवेन सह अवयविनः समवायसम्बन्धः अस्ति। पटाधिकरणे तादात्म्यसम्बन्धेन तन्तुरेव विद्यते। तादात्म्यम् एव अभेदसम्बन्धः। पटाधिकरणे तन्तोः च अभेदसम्बन्धो वर्तमानत्वात् तन्तुरेव पटस्य समवायिकारणम्।

18 Tuesday

असमवायिकारणम् → असमवायिकारणस्य लक्षणं प्रणम्यते - कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतत्वे सति यत् कारणं तदसमवायिकारणम्। यथा- तन्तुसंयोगः पटस्य, तन्तुरूपं पटरूपस्य। अर्थात् कार्येन सह अथवा कारणेन सह समानाधिकरणे अर्थात् समवायिकारणे समवायसम्बन्धेन यत् विद्यते तदेव असमवायिकारणम्। कार्येण सह कारणस्य उदाहरणं यथा- पटं प्रति तन्तुसंयोगः इति असमवायिकारणम्। कार्योत्पत्तेः पूर्वं तन्तुसंयोगः नियतपूर्ववृत्तित्व ~~अन्यथासिद्ध~~ त्वात् कारणम्। तत् कारणम् अपि अर्थात् तन्तुसंयोगः पटात्मककार्येण सह समवायिकारणे अर्थात् तन्तौ समवायसम्बन्धेन विद्यते अतः तन्तुसंयोगः पटस्य असमवायिकारणम्। एवं तन्तुरूपं पटरूपं प्रति कारणेन सह असमवायिकारणस्य उदाहरणम्। तन्तुरूपं तन्तौ समवायेण आश्रयते। पटरूपस्य कारणं पटमपि तन्तौ समवायसम्बन्धेन विद्यते। अतः तन्तुरूपं पटरूपस्य असमवायिकारणम्।

ltraTech

Scanned by CamScanner

समवायिकारणवत् असमवायिकारणमपि कार्योत्पत्त्यनन्तरं कार्ये एव तिष्ठति।

निमित्तकारणम् – निमित्तकारणस्य लक्षणं तु अन्नंभट्टेनोक्तम्- 'तदुभयभिन्नं कारणं निमित्तकारणम्' यथा- तुरीवेमादिकं इति। 'तदुभयभिन्नम्' (अर्थात्) समवाय्यसमवायिकारणभिन्नम्। कार्योत्पत्त्यनन्तरं निमित्तकारणं कार्ये स्थातुं शक्यते न वा शक्यते। साधारणासाधारणभेदेन निमित्तकारणं

[असमवायिकारणस्थिते सति कार्योत्पत्तिः भवति अर्थात् तन्तुसंयोगे सति पटोत्पत्तिः भवति। अतः असमवायिकारणनाशे वस्तुनाशः भवति।]

द्विविधम्। सर्वं कार्यं प्रति यत् निमित्तं कारणम् तद् साधारणकारणम्। यथा ईश्वरादिः। असाधारणन्तु पूर्ववत्। तन्त्वादि



त्रिषु कारणेषु असमवायिकारणमेव असाधारणम्। यतः तत्र व्यापारः तिष्ठति। तद् जन्यत्वे सति तज्जन्यजनकं व्यापारः। व्यापारवशात् हि असमवायिकारणेन कार्योत्पत्तिः दृश्यते। असमवायिकार यथा→ तन्तुसंयोगेन पटोत्पत्तिरिति। असमवायिकारणेन यथा कार्योत्पत्तिवत् च एतद् कारणेन कार्यं च ध्वंस्यते। यथा- तन्तुसंयोगनाशेन पटरूपस्य नाशः। एतानि वैशिष्ट्यानि समवाय्यसमवायिकारणे वा न वर्तन्ते। अतएव असमवायिकारणस्यैव असाधारणमुच्यते। एवं इदं कारणं करणमिति आख्यायते।

Scanned by CamScanner